ह्यतेतत्रदुःखविशिष्टानुमितिरनुभवसिद्धासमर्थिताभवति। अन्यथासुखविरहस्यैवतत्रसिद्धिप्रसंगादित्याहुः। एवंचेति। अत्रचाप्रामाण्याभावरूपमेवसाध्यं। तेनतत्प्रसिद्धिरे
मत्रै वाग्र। ननुतद्भावस्यसाध्यस्यप्रसिद्धिरपीत्यर्थः। अतएवेतरव्यापकतेति। एतच्चानुमानप्रकारोपप्रदर्शनमात्रमित्यत्रैवानुसंधेयं। प्रामाण्यमिति। अप्रामाण्याभावोतद
त्यर्थः। तेनैवेति। नचासिद्धसाधनं। तत्प्रकारकप्रतीतेरुद्देश्यत्वेनसिसाधयिषयावानुमानादित्याहुः। प्रामाण्यविशिष्टानुमितिः। अप्रामाण्याभावविशिष्टानु
मितेः। तद्वतीति। तद्वत्तात्वंतद्विशेष्यकत्वंतद्भाववद्विशेष्यकत्वेत्यर्थः। ननुतद्वद्विशेष्यकत्वकोटेरप्रसिद्धौकथमनुमितिसंशयः। प्राग्नवीयसंस्कारादिनाकथंचित्तत्प्र
॥११॥ सिद्धौवातद्वत्साध्यतांकिमनयाकुसृष्ट्या। किंवानुमितित्वावच्छिन्नतमाभावेननिषेधात्साध्यतावच्छेदकावच्छिन्नाखंडाभावएवसिद्ध्येदित्यस्वरसादाह। यद्वे
ति। अत्रसाध्येहेतौचविषयपदंविशेष्यपरं। तेनाप्रमतेनाप्रामाण्येतरं। नचाहेतावसिद्धिरितिवाच्यं। उक्तव्याप्तेरेकत्राबाधेवह्नित्वाभाववद्विशेष्यकत्वमेवसिद्धं। ननुविशेष्य
॥ भावः। वह्नित्वप्रकारकत्वस्यसाध्यत्वेनतद्भूतत्वेनसाधनात्। नचाचहेतौनविशेषणासिद्धिरितिभावः। अत्रेदंचिन्त्यं॥ ॥ अत्रापिवह्नित्ववद्विशेष्यकत्वंसाध्येम ॥१॥
प्रसिद्धौप्राग्नवीयसंस्कारेणामनसावाकथंचिद्वह्नित्वप्रसिद्धौदाहसमर्थेत्यादिहेतुनावह्नित्वप्रकारकानुभवेनतद्वत्साध्यतांकिमप्रामाण्याभावानु
मानेन। नीहितस्यहेतोर्नैतत्साध्यव्याप्यत्वं। येनहेतुःसिध्येदितितदनुमानमाद्रियते। प्रामाण्यज्ञानंहिप्रवृत्त्यंगंननुलिंगविशेषाधीनतया। यदिचप्रामा
ण्यज्ञानवदप्रामाण्याभावज्ञानस्याप्यप्रामाण्यशंकानिवर्तनेनद्वाराप्रवृत्त्युपयोगित्वमितितदनुमानेनतदातदनुमानपूर्वकमिदंप्रामाण्यमानम उ
मर्थकं। अप्रामाण्यशंकानिवर्तकस्ततएवभावात्। किंचाप्रसिद्धाभावेऽपिप्रतियोग्यप्रसिद्धावप्यतिरेकव्याप्तिग्रहेसतीतिसिद्धौनवाप्रामाण्यप्रसिद्धि
प्रामाण्येवह्नस्याप्यतोदूषणत्वात्। तद्धिप्राग्नवीयसंस्कारानुसरणेऽप्रामाण्यानुमानादपिमेवतदनुसरणमहत्त्वाद्यवाद्वेशपक्षत्वाच्च। प्रमेयमि
त्यादिज्ञानेवाऽप्रामाण्याभावोऽनुमानासंभवात्। कथंप्रामाण्यानुमानात्। तत्रचप्रकारांतरानुसरणमप्येवंप्रकारःसर्वत्रानुसंधेयतां। एवंवह्नित्वाभावप्रकारके
ज्ञानेवह्नित्वाभाववद्विशेष्यकत्वमेवप्रामाण्यंतदनुमानंचाप्रामाण्याभावानुमानपूर्वकंअनायावाभावाद्युः। अन्यान्याप्रयातं। तत्रवह्नित्ववतिवह्नि
त्वाभावप्रकारकत्वेऽप्रामाण्यंतथाचवह्नित्ववद्विशेष्यकत्वेज्ञातेवह्नित्वाभाववद्विशेष्यकानुमाने। तस्मिन्प्रज्ञातेतेतदनुमानमिति। नान्यः। तथैवा
न्यत्रापिप्रामाण्यानुमानसंभवेनाप्रामाण्याभावानुमानपूर्वकंतदनुमानेगौरवात्। किंचाप्रामाण्याभावग्रहेलिंगग्रहसमर्पितविशेष्यकत्वमग्र

हीत्वान्तरानुमानसंभवः। ननु गृहप्रकारस्यायं घटत्वेनैव वह्नेः तेन तथा च तद्वगमकाले वह्नित्ववह्निशेषणकत्वं किं हस्तापिहितं येन तन्न गृहीतं स्या
त्। प्रवृत्तौ तु वह्नित्वस्याग्रहेन गृहसमर्थितावच्छेदकत्वेनोपस्थितेः तथा च प्रथमं मनसा तत्तद्गृहे एव। अपि च प्रथमं प्रामाण्याभावानुमानस्थले यदि प्रामा
ण्याभावसंदेहः प्रामाण्यसंदेहो वा तदा तत्र कोटिप्रसिद्धेरावश्यकत्वात् प्रसिद्धाभावानुमाने प्राप्यसिद्धिः संगता। अप्रामाण्याभावप्रसिद्धेः प्रसि
द्धाभावस्यैव साधनात्। प्रामाण्यप्रसिद्धेः तस्यैव साधनात्। यदि तु नत्र संदेहस्तदा प्रामाण्यशंकाभाव एव यादृशस्य यादृशे व प्रवृत्तिरिति किमभावानुमानेन
तस्मात् प्रथमं प्रामाण्यानुमानप्रयोजकसाध्यप्रसिद्धिप्रयोजकत्वेन अभावानुमानस्य तदा परं तदनुमानपूर्वकं तदनुमानं संगच्छते। न चैवं नास्त्येवेति। के
चित्तु ... अभिप्रायेणायं प्रकार इत्याहुः। विषयताश्रयेति। इदं साध्यं परस्परविरहाप्रकारकविशिष्टप्रकारकज्ञानत्वादिति हेतुमभिप्रेत्य। अन्यथा तु
... नैव व्यभिचारापत्तेः। केचित्तु विषयताश्रयावच्छिन्नवह्नित्वप्रकारकं नेति साध्यार्थः। अतो नोक्तव्यभिचार इत्याहुः। न तु प्रथमं साध्याप्रसिद्धे
रिति। अत्रापीदं चिन्त्यम्। भवेदेवं यदि प्रथमानुमानेन साध्यप्रसिद्धिः स्यात्। तन्न। तेनाभावस्यैव साधनात्। प्रकारान्तरेण च साध्यप्रसिद्धेः प्रथमप्रामा
ण्याभावलिङ्गत्वाभिमतेनैव तत्सिद्धिसंभवः। तस्यापि प्रामाण्यव्याप्यत्वात्। अवह्नित्ववति विषयताकत्वाभावेऽसति सविषयत्वादिति हेतुसिद्ध्यर्थं प्रथमा
नुमानावतार इत्यपास्तमेव निरस्तम्॥ न साध्ये वह्नित्वेति। विशेष्यधर्मिणि तस्याः वह्नित्वासमानाधिकरणत्वादिसामानाधिकरण्यादिति भावः। न चै
ता। ननु मणित्वमणिज्ञानत्वे ... ज्ञानवतः फलतानैव प्रमागोचरमणित्वनिश्चयस्य मण्यप्रवर्तकतया मणित्वाभाववद्विशेष्यकतया चैव व्यभिचारः स्यादिति
चेत्। न। फलज्ञानाप्रवर्तकत्वस्य वक्ष्यमाणत्वात्। समानविषयत्वेन प्रवर्तकत्वस्य विवक्षणात्। ज्ञानप्रयत्नयोरिति। ननु अनयोर्युगपदुत्प
त्तियोर्मनसा कार्यकारणभावग्रहः संभवो न संभवति। तयोः क्षणिकत्वेन युगपदवस्थानाभावात्। न च स्मृत्युपनीतेन ग्रहः स्मृतेरुपस्थानगोचरायास्त
दनुव्यवसायपूर्वकत्वात्। तथा च प्रवर्तकतानस्य यद्यनुव्यवसायस्तदा तत एव प्रवर्तकज्ञानं विना शेषप्रवृत्तेरेव हेतुभावे इत्यनुमानस्य हेतुत्वधीः
अननुव्यवसाये च संस्कारानुत्पादे कुतः स्मृतिः कुतो वा तदुपनीते तदेतुत्वधीरिति चेत्। अत्र वदन्ति। ज्ञाने ज्ञाते चेतस्य ज्ञानत्वेन सामान्यविषयकज्ञानत्वेन
वा सामान्यलक्षणया ज्ञाने सति तेन ज्ञानेन चानागतस्यापि विषयीकृतत्वेन नानाहृदयस्य ज्ञानान्तरस्य पुनरुत्पादे प्रवृत्त्यनन्तरं कार्यकारणभावपरि
च्छेदः॥ सामान्यलक्षणया प्रत्यासत्त्या प्रागेव विषयीकृतस्य चरमोत्पन्नस्य प्रवृत्तिजनकज्ञानस्य प्रवर्तकत्वं स्मृत्युपनये बाधकाभावात्। इदमपि

वसामान्यलक्षणस्वीकारे वीतं अन्यथा ज्ञाने ष्टादिजन्यत्वमनकत्वप्रत्तीनेस्यादिति। वस्तुतस्तत्पत्रव्याप्तवसायानन्तरं विषयविशिष्टज्ञानानुव्यवसा
भक्तः यस्तदनंतरं विनश्यदवस्थेनव्यवसायेनेच्छाद्युत्पादने तत्र संस्कारो न दुर्लभः यत्र चेच्छासामग्रीबलवत्वाद्व्यवसायानन्तरं इच्छा तदनन्तरं विनश्यदव
स्थेनानुव्यवसायजननं तेनैव विनश्यदवस्थेच्छाया प्रवृत्तिः तत्रापि न दुर्लभः गौरवात् व्यवसायमपर्यन्तं तथानुव्यवसायं प्रति व्यवसायस्य हेतुत्वादिति। ननु तथापि
समर्थप्रवृत्तिजनकतावच्छेदकस्य प्रामाण्यस्य ज्ञाने कथं तादृशप्रवृत्तिकारणताग्रहः॥ ज्ञाने वा किं साधनमिति चेत्। नं तत्र गतरहित मानान्यायेनैव्य
॥१२॥ क्वापि न तत्र ग्रहसंभवादित्येके। एतदस्वरसादेवदाहसमर्थीविशेषावृत्तिहितीयहेतुरित्यन्ये। अभावसाध्यकेति॥ अप्रामाण्याभावसाध्यके उत्थापः॥ निर्विक
ल्पकस्येत्यत्र पल्लवलंघरादेरपीति द्रष्टव्यं। सपक्षत्वे नेति। साध्यवत्वेनेत्यर्थः॥ साध्याप्रसिद्धिदशायामेवाभावानुमानादिति भावः। न चेत्यादि। अत्रापि
साध्ये हेतौ च पूर्ववत्संगतिरूहनीया। अन्ये त्विति। अत्र साध्ये पृथिवीत्वसमानाधिकरणत्वं तदधिकरणानधिकरणत्वं हेतौ च गंधासमानाधिकरण
त्वं तदनधिकरणाधिकरणत्वमेव एवं च गगनादिप्रकारके गगने गगनत्वमित्यादिज्ञाने व्याप्तिः। गंधसमानाधिकरणप्रकारकेति विशेषणं। अत्र गंधसमानाधि
करणः प्रकारीभूतो धर्मो यस्याः सा मानाधिकरण्येन संबंधे नास्ति सा विषयता तादृशप्रकारिकाविवक्षिता। तथा च गंधसमानाधिकरणप्रकारसमानाधिकर ॥१२॥
णत्वपर्यवस्यतीति तेन नोक्तव्यभिचारः। न चैवं गंधसमानाधिकरणत्वमात्रमेव विषयताविशेषणमस्तु लाघवादिति वाच्यं। गंधसमानाधिकरणत्वस्य वि
षयतापदार्थेऽन्वये नव्याप्ये विशेषणत्वानवकाशात्। गंधासमानाधिकरणप्रकारकेऽपि विशेषणं पृथिवी पृथिवीतत्वेवेति संशये व्यभिचारवारणा
येति वृद्धाः। तन्न। अयं गगनवान् पाकजरूपवांश्चेत्यादिरविशेषाकप्रमेव्यभिचारात्। वयं तु गंधसमानाधिकरणप्रकारकत्वेन साधिकरणमात्रप्रका
रकत्वं विवक्षितमिति नोक्तव्यभिचार इति ब्रूमः। अन्ये तु साध्येपि प्रकारपरं धर्ममात्रपरं निर्विकल्पकेपि विषयतातु हात् तत्र व्यभिचारवारणाय
गंधसमानाधिकरणप्रकारकेति विशेषणमित्याहुः। एतत्तु गंधासमानाधिकरणप्रकारक विषयताप्रतियोगिज्ञानत्वादित्येको हेतुः॥ मात्रपदं तन्मोचेन
गंधसमानाधिकरणमात्रप्रकारकविषयताप्रतियोगिज्ञानत्वादित्यपरो हेतुरिति हेतुद्वयेनात्राप्यमिति॥ तत्तु ठं। गंधसमानाधिकरणप्रकारकत्वे
सति गंधसमानाधिकरणप्रकारकत्वमेवत यावच्छेदावृत्तिविशेषणत्वमेव। सत्यंतमात्रस्यैव विवक्षितत्वे प्रथमहेतु विशेषः॥ विशेष्यभागमात्रस्यैव वि
वक्षितत्वे प्रथमहेतौ विशेषः। विशेष्यभागमात्रस्यैव विवक्षितत्वे प्रमेये संशयादौ व्यभिचार इति। तेनेति। गंधासमानाधिकरणप्रकारकत्वविशे

मात्रं हि प्रकारकत्वं हि गंधासमानाधि-
करणा २

षणोनेत्यर्थः। निष्प्रकारकं चेति। तद्विशेषणांशावगाहसंशयव्यावृत्त्यर्थं। नत्वस्यानेन निष्प्रकारकत्वं वा देयमित्यर्थः॥ नचैवमपि नष्टंभ्रमव्यावृत्तिरिति वा
च्यं। परस्य रवि [illegible] रूढा प्रकारत्वपर्यन्ते निष्प्रकारकत्वपदेन तस्यापि व्यावृत्तेरिति। केचित्तु गंधसमानाधिकरणः प्रकारो यत्र समानाधिकरण्येन सं
बंधेनास्तितादृशविषयताश्रुतियोगिनि निष्प्रकारकत्वेति विवक्षितमतो भ्रमव्यावृत्तेरित्याहुः। ननु प्रकारभेदेन विषयताभेदात्पृथिवीत्वमात्रप्र
कारकविषयतामादाय शीतापृथिवीत्यनुभवे गंधासमानाधिकरणत्वादिहेतुसत्वाद्व्यभिचारमुत्याशंक्य निकरोति। शीतेति। नयाचे
पृथिवीत्वांशे साध्याभावसत्वेपि शीतत्वांशे साध्याभावसत्वेपि हेतुरेव तत्र नास्तीति। नव्यभिचार इत्यर्थः। भ्रमप्रमेति। तेजलपृथिव्योरपि नेपृथिव्याविति समूहा वि ५
लंबनेरित्यर्थः। इदं च शीतापृथिवीत्यनुभवे प्रकारभेदेन विषयताभेदाभ्युपगमेन हेतुसत्वमभ्युपेत्य समाहितं। वस्तुतस्तु नप्रकारभेदेन विषयताभे
दोमानाभावात्। किंतु विशेष्यभेदेनैव। अन्यथा जलपृथिव्योरिमे पृथिव्याविति समूहालंबनेपि एकस्या एव पृथिवीत्वमात्रप्रकारकविषयतामादाय हेतु
सत्वेन पृथिवीत्वासमानाधिकरणजलत्वनिष्ठप्रकारावच्छिन्नविषयताकत्वात्साध्याभावसत्वेन व्यभिचारापत्तेः। तथा च तत्र शीतत्वपृथिवीत्वोभयप्रका
रावच्छिन्ना एकैव विषयतेत्यक्रं हेतोस्तत्राभावान्नव्यभिचार इत्याह। विशेष्यभेदेनेत्यादि। भास्करमतमाह॥ पीतेति। गंधासमानाधिकरणेति। व १॥
असमानाधिकरणत्वं तदधिकरणानधिकरणत्वं धर्मपदं च नविवक्षितं तेन गगनेन गगनमिति ज्ञानेन नव्यभिचारः। सप्रकारकत्वेन विषयताविशेषणत्वे निर्वि
कल्पकेन व्यभिचार इति ध्येयं। अग्रिमहेतावपि पृथिवीत्वप्रकारकपदं निर्विकल्पके व्यभिचारवारणाय। किंवा पीतादिरिति अन्ये पीदं चिंत्यं॥ साध्याप्रसिद्धावपी
दृपि नेतत्प्रामाण्यानुमाने मिथ्यापत्तिः। कथंचित्तदुपपत्तौ प्रथमत एवोक्तहेतुभिरेतत्साध्यसिद्धावविरोध इति। उक्तरीत्यैवान्यत्रापि प्रामाण्यानुमानमि
त्याह॥ एतेनेति। ज्ञानांतरोपस्थापितेति। अत्रेदं चिंत्यं। ज्ञानांतरोपनीतेन तद्वत्वं मनसा [illegible] गृह्यत इति नवापि अनुमानेनान्यथा ततः प्रामाण्यग्र
हस्यासंभवात्। एवं व्यवसायोपनीतं तद्वत्वमपि अनुव्यवसायेन तत्प्रकारत्वमेव। नहि ज्ञानांतरोपस्थापित एव ज्ञानेन मनसा प्रामाण्यग्रह॥ ननु योग्यसन्नि
कर्षे तन्मिन्नित्यत्र मानमस्ति। नहीदं [illegible] यस्यापि स्वभावोपदुपनीतमुपनीतं वा [illegible] तैयेवग्र [illegible] ति। तथा सन्निकर्षभिचं [illegible] इत्यादि चाक्षुषमानानुपपत्तेः॥
मनसस्तथास्वभावत्वेपि नास्ति मानाभावात् अहेतोरित्यादिप्रत्ययास्त्वानेनाय अनुषएव आत्माविशेष्यकत्वानुपपत्तेः। मीलितावस्थतुल्यत्वं च वाच्यं॥ नच
संशयानुपपत्त्या स्वभावांतरकल्पनं तस्यान्निराकृतत्वात्। तथा च कथं न परतस्त्वापाय इति। अपि च मनसा तथैव प्रामाण्यग्रहे परतस्त्वापत्ति दुर्नोपि

वैदिरिति दुष्टजन्यत्वज्ञाने उ
पनीतं विषयत्वेनैव भा
सत इति नियमादिति भावः

नश्च वृत्त्युपयोगीति तस्यावशंपवेद्यत्वाभावात्। सामान्यलक्षणादिनाप्रयमतएव समवत्त्वप्रामाण्यावधारणं ॥१०॥ ति

म॰ कृ॰ किं मतिपूर्वभवीयसंस्कारानुसरणात् प्रामाण्याभावानुसरणं वा नत्वोपपादितमिति। ननु ज्ञानेति। अत्र जेनाप्यदृह्य स्वमते च परमते च व्यावर्त्यासिद्धेः। अन
एव पूर्वं तत्र पैवब्धतमिति। ननु तावेवं प्रामाण्यग्रहस्य तत्तज्ज्ञानविषयकं जन्यज्ञानजन्यत्वात् न परतस्त्वतानिरिक्तिः पारः अन्याह शास्त्वयुक्त इत्याहुः॥
13 उद्राहरति। यथेति॥ भ्रमा शरीरत्ववति शरीरत्वप्रकारकमित्यर्थः। शरीरत्वं शरीति॥ शरीरत्ववतीत्यादि साध्यमत्तादित्यर्थः॥ एतेनेति निरस्तमित्यन्वयः॥ व्या
वर्तेति। शरीरज्ञानत्वं भ्रमसाधारणं शरीरविशेष्यकज्ञानत्वं च प्रामाण्यरूपं साध्यमेव अन्योन्य दृष्टं चमित्यर्थः॥ शरीरमिति। शरीरत्वमात्रप्रकारकं
ज्ञानं पक्षः। न त्वेकशरादिमत्वप्रकारकं। तत्र स्वमसिद्धमित्यर्थः। विषयत्वमिति विशेषत्वेन समप्रत्यक्षे सोपरिमितुत्कानुरागसमेनाभावादित्याशयः। ननु कस्व
॥३॥ रणाभूतोविषयक शरीरत्वप्रकारकज्ञानान्य शरीरज्ञानत्वादीति हेतुः। न यावज्जनासिद्धिः॥ शरीरत्वाघेरा शरीरत्वप्रकारकत्वाभावादित्याह॥ न चेति॥
फलत्वं गुरवीमते न वक्ष्यां निराकरोति॥ अत एवेति॥ यतो प्रामाण्यशकाप्रयुक्तमेव ज्ञानस्वापीत्यप्रायकमित्यर्थः। अत एवेति। यदि प्रामाण्यज्ञाने प्रामा
ण्यसंशयस्यावरणकइत्यर्थः॥ भट्टपक्षे उत्पूपत्तसमाभिसूमतेपि दृष्टव्यं॥ गुरुमतेपीति। यदि च प्रामाण्यस्य स्वग्राह्यत्वावधारणं न प्रवृत्त्युपयोगी
ति तस्यावशंपवेद्यत्वाभावात्। प्रामाण्याभावे हेतु देनैवस्वग्राह्यत्वावधारणा दूतरेतर तान्प्रामाण्येस्वग्राह्यत्वानुमानानुसरणानवशंपभावसंवन्मते
ज्ञानवस्यात दामं मा पुनरेतत्र समकालज्ञानप्रामाण्यावधारणं दूतरेतरज्ञानप्रामाण्यानुमानानुसरणानवशंपभावाद्वनावेनवस्थेति तु ल्यमि
तिभावः॥ अज्ञानाद्यस्यानवधृप्रमितिष्वितिपि विषये ज्ञानविषयत्वरूपसमानधर्मी द्वेवसंशयोस्त्व प्रवृत्तत्तुप्रामाण्यसंशयादित्यनेनाह॥ ज्ञानेति॥ तद् ॥१२॥
पि प्रामाण्यसंशयसहायमेव तत्र असौ गायकमन्यथाम्न देवसंशयापत्तेरित्यर्थः॥ ननु किं प्रामाण्यग्रहे लापुरोवर्तिनिकशरादिमतेग्रहोतेविशेषदर्शना
देवसंशयाभावः। तद्ग्रहे तु करादिमतिपुरुषत्वज्ञानत्वादेर्लिंगस्याग्रहात् केयं प्रामाण्यग्रहः कथं वा विशेषदर्शनं विनानेन संशयो नरपुर
षत्वादिप्रत्यक्षं जायेत न स्यात् एवं त्वादिति चेत्। अत एवेति। तदापि पुरुषत्वादिव्याप्यवैतन्यग्रहमाणकरादिपुरोवर्तिनग्रहो ते। न तु द्वितीये वक्तव्य
ज्ञानप्रामाण्यग्रहे विशेषदर्शनादेव पुरुषस्वत्वादिनिश्चयः॥ यत्र पुरोवर्तिनि धृतत्पागृहीमाणकरादौ पुरुषत्वादिव्याप्यग्रहे विनैव प्रमोत्प
न पुरुषादिज्ञानं वक्रादिमति पुरुषज्ञानत्वादिके पुरुषादिप्रमात्वव्याप्यतया गृह्यते तत्र तज्ज्ञानप्रामाण्यनिश्चयानंतरं पुरुषत्वादिनिश्चयः। न चैवाप्यवृत्ति
व्यापकज्ञानत्व व्याप्यतया मगृहीत्वा विपक्षे बाधकाभावेन प्रामाण्यव्याप्तिरेव [illegible] नगृह्यत इति वाच्यं। शब्दादिनापि व्याप्तिग्रहसंभवात्। विपत्त

संशयाभावे प्रवृत्तिकज्ञानानिर्वाहादिति। अन्योन्याश्रयात्र समानविषयस्याविरोधित्वात्तस्य प्रतिबन्धकत्वेऽपि प्रकृते अनभ्यासगताभिमतविषयकस्थापितत्वात्वं क
बाधकं तस्यापि संभवात्। तदानीं पुरुषत्वादिप्रमाविषयत्वस्यैव पुरुषत्वादिव्याप्यस्य दर्शनात् तत्रान्योन्याश्रयो दोष इति। पर्वतेति। तत्र यत्पि वा व्याप्तिमिति संबन्धः
। तथा च सर्वत्र नाप्रामाण्यशंकायेनानवस्थादिति भावः॥ तन्मानविषयकेति। ननु प्रथमज्ञाने प्रामाण्यानिश्चयेऽपि द्वितीयज्ञानेन कथं नाप्रामाण्यशं
कातत्र विशेषदर्शनाभावात्। न ह्यत्र धर्मिणि लिङ्गरादिमत्त्वानेन्याज्ञापि न पुरुषसंशयोऽनुभवविरोधादिति चेन्न॥ ॥द्वितीयतन्तस्य यदि नानुव्य
वसायः तदा धर्मिज्ञानाभावादेव न तत्राप्रामाण्यसंशयः अनुव्यवसायश्चेत्तदा विशेषदर्शनादेव न तत्संशयः। तदनुव्यवसायेऽपूर्वत्वात् गृही
तप्रामाण्यस्योपनीतस्य भानं नियमात्। न च तदुक्तत्वेन पूर्वमभानात्तत्रोपनय इति वाच्यं। यद्वक्तृत्वे नहि पक्षयतत्र गृहीतं तत्र तदुद्ह स्यैवोपनीतस्य भानस
मर्थत्वात्। तथा च तद्विषयकत्वावच्छेदेन पूर्वज्ञाने प्रामाण्यग्रहात्तद्विषयकत्वेन तो तेद्वितीयज्ञानेन तदुपनये बाधकाभाव एवास्य तत एव प्रामाण्यानुमा
नमप्येवं तस्मिन्ननुमितिज्ञानान्तरे तदुपनीतभानादप्रामाण्यपरतस्त्वे टीकाविरोधं परिहरति। पर्वतेति। स्वतो ग्रहासंभवादुपवारस्कल्पान भिन्नभावः
तदूमवति वह्निज्ञानत्वमिति। ननु धूमवति वह्निज्ञानत्वमित्यनेन धूमप्रकारकत्वे सति वह्निप्रकारकत्वं विवक्षितं। धूमवद्विशेष्यकत्वे सति वह्निप्रका
रकत्वं वा। नाद्यः। तस्य भ्रमरूपवह्न्यनुमितावपि सत्त्वेन प्रामाण्यनियतत्वाभावात्। नान्त्यः तस्यानुव्यवसायाग्राह्यत्वात्। तद्ग्राह्यत्वे वा धू
मवत्त्वांशे तत्र स्वतः प्रामाण्यग्रहापत्तेः। तत्र चेष्टापत्तौ किमपराद्धं वह्निमत्त्वांशेन स्वतः प्रामाण्यग्रहेण। प्रत्युत तदंश एवाप्रामाण्यशंका
विरहात्तत्र तद्योग्यत्वमनु धूमवत्त्वांशे। तद्देशोपशमशीरवानुमितावपि तदंशकायाश्च प्रतिरोधात्। तत्र तत्प्रतिरोधकस्य धूमवत्त्वांशे
व्याप्यस्फुरणादेरभावादिति चेन्न॥ अत्र वदन्ति। लिङ्गज्ञानस्यैवाप्रामाण्यशंकाविरहे तत्त्वेनानुमितावुत्तरकाले प्रामाण्यसंशयेऽवाधकाभा
व एव। यत्र तु लिङ्गतानस्यैवाप्रामाण्यशंका तत्र केनानुमित्युत्पादः तत्र तत्प्रामाण्यानुमित्या लिङ्गनिश्चये सत्यनुमितिरिति तदनुमि
तौ तद्वद्विशेष्यकत्वं भासितुमर्हतीति। समानविषयकज्ञानान्तरवादिति तदेवानुमिति विशेषाभिप्रायकोऽयं ग्रन्थ इति। अनुव्यवसायस्येति। अनु
व्यवसायत्वस्येत्यर्थः॥ नन्वस्य प्रामाण्यानिश्चितस्यापि तन्नियतत्वेनाग्रहात् तद्रूपेण ज्ञानस्य संशयानिवर्तकत्वात् नहि व्याप्यतानंमा
त्रात्संशयनिवृत्तिः। अन्यथा गोत्वं पृथिवीनवत्तिसंशयो न स्यात्। एवं धूमवद्विशेष्यकत्वस्याप्यनुमित्यानुव्यवसाये नग्रहे यदुक्तं त

ल्यानत्याद् अनुमितिप्रामाण्य १

प्पा२ ना६

नस्त्तत्संशयनिवृत्तिरित्यनुपपन्नोयं ग्रंथः तस्मादेतत्किंचित्। केचित्तु धूमवद्विशेषावलंबाद्देःप्रामाण्यग्राह्यतया पूर्वग्रहात्तत्रोचरसंस्का
॥ म कू॥ रेमतिसंशयाभावस्यावश्यंदर्शनात्तत्स्वरूपेणाप्रामाण्यपितन्तु हस्याश्रितिबंधकत्वमिहैवानन्यगत्याकल्प्यत इत्याहुः। यत्रतन्नियतत्वेनकदा
चित्तत्संयोगनपरस्तत्मात्राभिप्रायकोयंग्रंथउक्तोहि। विशेष्यनिश्चेति। यद्यपिनिष्कंपप्रवृत्त्यपेक्षितन्तु इतितन्तुभास्कत्वरूपंप्रामाण्य
॥१४॥ नत्यापिसंशयानुपपत्त्यातद्दर्शनस्वतोवेद्यमितिभावः। एवंसतिअद्वितिप्रवृत्तिमुपपादयति। अदृष्टेति। अत्राप्यप्रामाण्यसंशय हं
कानवृत्तिः पूर्ववदेवचिंत्या। प्रामाण्यज्ञानप्रवृत्तेर्कत्वमभ्युपेत्याह। अदृष्टेति। तत्समवधानं प्रामाण्यानुमितिसामग्रीसमवधानं तत
१४ याचप्रवृत्तिरदृष्टिभवंतीकारणतयाअदृष्टिप्रामाण्यग्रहमाहितयेत। सोपिअदृष्टिलिंगजन्यदिसमवधानेनुस्वतःप्रामाण्यतस्यनिषे
धादितिभावः। तदनुरूपमेवोदाहरति। नहीति। केचित्तुयत्रव्यवसायप्रामाण्यग्रहाधीनाप्रामाण्यशंकानिवृत्तिस्तत्रैवतत्सामग्री
विलंबात् अदृष्टिप्रवृत्त्यनुपपत्तिरित्यतस्त्याह। अदृष्टेति॥ ७॥ इतिज्ञप्तिप्रामाण्यप्रसंगादाह। उत्पत्तौ चेति। अत्रज्ञानसामग्रीमात्र प्रमातं ८ ॥१६॥
प्रयोज्यंनवेतिविप्रतिपत्तिरित्याहुः॥ स्वतइत्यस्यविवरणं ज्ञानेति। विपक्षेबाधकंतदेवमाह। तदन्यत्वइति। यद्यपिअत्रयथार्थत्वेवैयधिकर
ण्यं तथापिप्रमात्वेवहितानसामग्रीमात्रप्रयोज्यत्वेतिः स्यात्तस्यप्रमात्वेनिःस्यात्। अप्रमात्ववदित्यापादनीयेअप्रमायादोषजन्यत्वाह
ष्टांतस्यापादकासिद्धिरित्याह। ज्ञानेति। तदीति। यथायदसामग्र्यानीलानुप्रवेशात्तस्यभानीयरविशेषः॥ एवंप्रमासामग्र्यांदोषा
नुप्रवेशात्तस्यप्रमानाप्रमाप्रमाविशेषःस्यात्। अन्यथातानविशेषोपिनस्यादित्यर्थः। तदस्यः प्रत्यावतिष्ठतेअग्रयति। तथाच
पूर्णान्वयेव्यतिरेकानुविधानाभावात्। गुणदोषौनप्रमाप्रमाहेतूइतिभावः। तयोरिति। प्रमाप्र [illegible] वत्तेरितिभावः। नम
योरित्यर्थः। तत्सामग्रीविशेषसामग्री। सामान्यसामग्रीजन्यैवेतिशेषः। अन्यथाविशेषवैयर्थ्यं हेतुसामान्यकार्यत्वित्यापत्तेरितिभावः॥
ननुसामग्र्याः कार्यनियतत्वात्सामान्यसामग्रीसत्वेसामान्यकार्योत्पत्तिव्रत्तस्यापिनिवारयितुमशक्यत्वात्तस्याह। तांविने

२१

त्ति। तथाचानुगतात् भावस्य प्रमात्वानुभावसंपादकनहाराप्रमात्वाभावप्रयोजकतया गुणादेः प्रमाविशेषप्रयोजकत्वमस्त्येवेति भावः। अन्यथेति। नित्यप्रमात्वावच्छे-
त्वदुक्तरीत्यानुगतप्राप्तिकारणविशेषस्याप्ययोगस्तत्र व्यतिरेकानुविधायित्वाभावात् इति भावः। भेदो व्यक्तिभेदः। वैधर्म्यं वैजात्यं। अन्यथेति। तथा च प्रमा-
त्वावच्छिन्ने नुगतो गुणो हेतुरिति भावः। उपाधित्वेनेत्यपि ... त्वं। नित्यवृत्तित्वेनेत्यपि द्रष्टव्यं॥ कार्येति। अनित्यप्रमात्वं कार्यतावच्छेदकं कार्यमात्रवृत्ति-
त्वादित्यस्यार्थः॥ घटज्ञानत्वादाविति। नित्यज्ञानपदेन घटनित्यज्ञानत्वादाविति बोध्यं। बाधमुक्त्वा विरोधं हेत्वाभासमाह ज्ञानाजनकेति कश्चित्तु ज्ञानाजनक-
त्वेन यदनिमित्तं तज्जन्यत्वे साध्ये विवक्षिते विरोधात् प्रतिज्ञाविरोधादित्यर्थः। प्रमाया ज्ञानत्वेन तज्जनकजन्यताभ्युपगमावश्यंभावेन तद्विपरीताभ्युपगमा- मु
त्प्रतिज्ञाविरोधस्य वास्तूपगममादायेव प्रवृत्तेरित्याहुः। दृष्टांतोपि साध्यविकल इत्याह। अप्रमायामिति। अप्रमात्वासिद्धिमाह। व्यर्थेति। विशिष्यत
इति व्युत्पत्त्या विशेषणपदेन विशेष्याभिधानात् व्यर्थविशेष्यत्वादित्यर्थः। जन्यमात्र एव साध्यसत्वात् ... दोहेतुजन्यत्वस्यैव व्यापकत्वे साध्य-
व्यर्थविशेषणत्वं वा ... व्याप्यत्वादिति। अप्रमायां तु गुणाजन्यत्वान्निश्चयदशायां जन्यपदव्यावृत्त्यस्य घटज्ञानस्याप्रसिद्धेरित्यर्थः।
वैदिकप्रमाहेतुगुणाश्रयत्वेनैव तत्प्रसिद्धेरिति भावः। ननु ज्ञानत्वावच्छिन्नसामग्र्यतिरिक्तसामग्रीजन्यत्वं विवक्षितं येनेंद्रियादीनामसिद्धसाधनं स्यात् तत्राप्यनु-
ज्ञानत्वाप्रयोजकसामग्र्यतिरिक्तसामग्रीजन्यत्वमित्यत आह विरोधाच्चेति। सामग्रीद्वयमिति। तथा च न विरोध इति भावः। अप्रमाया इति। ज्ञानत्वप्रयोज-
कज्ञानसामग्रीजन्यत्वाभावादित्यर्थः। हेत्वसिद्धेः ज्ञानत्वहेतोरप्रसिद्धेरित्यर्थः। तथा च तत्तद्यक्तित्वं सतः सर्वस्य सत्त्वस्य हेतुत्वघटितं तत्तद्धेतुप्रतियोगिकार्य-
तावच्छेदकमित्यर्थः। तेन प्रमेयत्वादेर्न दंडादिजन्यतावच्छेदकत्वापत्तिरिति ध्येयं। ज्ञानत्वं च तथेति। ज्ञानत्वमप्यस्य यो यावान् असन् तावतः सर्वसो
वसत्त्वं मनःप्रभृत्यधीनमपि तत्तत्कार्यतावच्छेदकं ज्ञानत्वं न वस्तुवेत्यर्थः। असत इति। यद्धर्माश्रयस्य सर्वस्य सत्त्वं यद्धेत्वधीनं तत्तत्कार्यतावच्छे-
दकमित्येवास्तु न त्वसत इति गौरवात्। एवं च न ज्ञानत्वं कार्यतावच्छेदकमिति भावः। व्योमादीति। व्योमादिसाधारणं सत्त्वमुत्पत्तिमित्त्वं
ति मानत्वमात्रं तस्य हेतुत्वे नियम्यत्वात्। हेतुनियम्यत्वं हेत्वधिकरणक्षणाव्यवहितोत्तरक्षणमात्रवृत्तित्वं न चोत्पत्तिमत्त्वसत्त्वेन तथात्वं
साध्यस्याप्रसिद्धिरिति भावः। ज्ञानत्वस्य नित्यवृत्तित्वेपि कार्यतावच्छेदकत्वं स्यादित्याशंकते। अन्यथेति। यद्धर्माश्रयस्या ५

॥मञ्जू॥ तरेपि पटादिसत्वस्य संभवात्। तथा चासत इति विशेषणोनासतां सत्वमुत्पत्तिर्लभ्यते। तेन यत्किंचिदाश्रयस्य सर्वाऽनुत्पत्तिर्यद्वन्तु नियमेनोत्पन्नत्वात्पर्य
।नन्वेवं घटत्वादिसमनियतेकं त्रुटीवत्वादावतिव्याप्तिरिति चेत् न। लघुत्वेन धर्मविशेषणादित्याहुः। नन्वेवमीश्वरादिजन्यतावच्छेदकं जन्य
॥१५॥ त्वेन स्यात्तस्य तत्वादेरेव लघुत्वेन तथात्वसंभवादिति चेत् न। एतन्मतदृष्टापत्तेः। ज्ञानत्वव न्नित्यवृत्तेरपि तस्य तथात्वाविरोधात्। यदितित
थाच हेत्वधीनपदस्यार्थान्तरपरिकल्प्यासत इति विशेषणं गौरवकरमिति भावः। न चैवमपि नित्ययत्वाभाववति प्रसंगः। बाधकाभावे स
15 तीत्यनेन विशेषणात्। तदर्थस्त्वग्रे वक्ष्यते। अनित्येति। यद्यपि मीमांसकमते ज्ञानत्वमपि कार्यतावच्छेदकं तथापि न्यायमते नास्याभि
धानमिति मंतव्यं। सिद्धसाधनमिति। यद्यपि ज्ञानत्वगर्भपक्षमसाध्योपि तत्पत्तथापि दोषान्तरस्योद्भटतयैव तद्रूपेतिते। प्रमात्वमिति।
यद्यपि कार्यतावच्छेदकमित्येतावतैव गुणसिद्धस्तथापि शरीरादिनिष्ठकारणतानिरूपितयौगिककार्यतावच्छेदकेनार्थान्तरवारणाय वि
शिष्टसाध्यमनुपात्तमिति केचित्। वस्तुतः प्रमात्वप्रविष्टज्ञानत्वस्यैव लाघवेन तदकात्वमिति बाधादेवनार्थान्तरं स्तुतस्तदुद्देश्यपासिद्धये वि ॥१५॥
शिष्टसाध्यमनुपात्तं। अत एव सिद्धान्ते अविशिष्टमपि साध्यमस्त्वेवेति भावः। ज्ञानत्वसाक्षात्त्वादिति। अत्र वैशेषिकोक्तं ज्ञानसाक्षात्त्वादिभाज
कोपाधित्वादित्यत्र समुदायस्य तात्पर्यं। विद्याविद्यादेतितत्र प्रथमविनाशात्। एवं च ज्ञानत्वव्याप्यज्ञानभिन्नभिन्नत्वादिव्याप्यत्वेन प्र
मात्वस्यनासिद्ध्यादिरितिध्येयं। प्रमात्वस्येति। तथा च बाध इति भावः। एतद्धेतुपलक्षणं। ज्ञानत्वस्यनित्यपद इति तयाकार्यतानवच्छेदकत्वे
न साध्याप्रसिद्धिरित्यपि द्रष्टव्यं। तथेति। कार्यतावच्छेदकमित्यर्थः। अनित्यप्रमेति। इंद्रियादिकं च तद्गुणपदेहेतुरिति भावः। न च प्रागभा
ववाज्ञि विशेषेणार्थान्तरं। भावत्वेन विशेषणादित्याहुः। ननु विषयत्वातिरिक्तेन रूपेण हेतुताविवक्षितेत्यत आह। शरीरेति। ननु प्रमाप
देन सर्वांशे प्रमा विवक्षितेति नोक्तदोष इत्यत आह। कारणेति। तर्कमाह। यदीति। न चेश्वरज्ञाने व्यभिचार इति चेत् न। अजन्यत्वेन विशे
षणादित्येके। अप्रमाविजातीयकार्यं न स्यादित्यर्थ इत्यपरे। वस्तुतस्तु प्रमानस्यादित्यापादनीयं। ईश्वरज्ञानं तु प्रमाप्रमावहिर्भूत

मेवेति मतेनास्या भिचारानुमितिः। अप्रमाव्यावर्तेपीति। संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन जनकत्वादिंद्रियमपि द्रव्यं त घेति। नन्वन्यत्वेनैव सिद्धसाधनमिति भावः। तर्केपीति। स
अपि: सत्कुच्छये तथा च तर्कानुमाने च व्यभिचारक इत्यर्थः। प्रमाप्रमान्यतरत्वादिति। न चेश्वरप्रमायां व्यभिचार इति वाच्यं। जन्यत्वेन प्रमाविशेषणात्। ईश्वरज्ञानं प्रमावृत्ति स्वं नभिन्नमिति मते
नोक्तत्वात्॥ विशिष्याह। वा नुमेति। स्वविरोधीति। अत्रानुभवग्रहणं स्वविरोधिस्मृतिप्रतिबंधकानुभवमात्रग्रहीजन्यत्वेनासिद्ध साध्यकतावारणाय। स्वपदं समभिव्याहृतपरोक्षे
तावप्यनुभवपदं स्मृतावेव व्यभिचारवारणाय निर्विकल्पके च व्यभिचारवारणाय सप्रकारकत्वं हेतुविशेषणमिति केचिदाहुः। तद्दूषं निराकरोति। दूरादिति। तद्दूषणं तेषा
ध्यैवेकल्पं निराकरोति। अप्रमायामिति। नन्वेवमनुगतहेत्वभावात्केद इत्यस्वरसादाह। किंचेति। यत्र तत्संभवः तत्र बाधकाभावादसौ सेध्या। अत्रतु तदसंभव इति भावः। न
हि गुणत्वदोषत्वजात्यवच्छेदेन तत्र तु मयत्वेनुत्वं तद्दूनावादित्यर्थः। जातिसंकरादिति भावः। ननु तादृशजात्यभावेपि उपाधिनैव प्रमाजनकत्वादि नातन्हेतुत्वमस्त्वित्यत
आह। प्रमेति। आत्मसत्त्वमिति। आत्मादावतिव्याप्तिः। एतद्वोपलक्षणं। आत्माश्रयात्वदेव तन्तु जनकतावच्छेदकमित्यपि बोध्यं। तन्मात्रेति। स्वध्वंसादिकं प्रत्यपि जनक
त्वादिति भावः। ननु प्रमामात्रेनुगतगुणाभावेपि यथार्थपरामर्शत्वादिकमप्यनुमित्यादावनुगतमस्ति तावतापि गुणसिद्धिरस्त्विति चेन्न। यथाप्रमा
मात्रे नुगतगुणाभावेपि नाकस्मिकत्वं तथोक्तं स्यात्पीत्याशपात्। प्रतिबंधेर्मुखेन समाधातुं भ्रमिकामास्वयति मिति। यथा यत्व्यादिवारितं त
दस्य प्रतिनायमनुयोगः। तथापि दोषहेतुत्ववारणे मीमांसकप्रत्नोवेति ध्येयं। पित्तादेरन्वयाद्यनुविधानात्तद्धेतुत्वं लभ्यमो वक्ष्यते तस्य हेतुत्वं प्र
साध्य एकदातरस्य मीमांसकैपृत्तीवोक्तमित्यन्यो। तहीति। तथा चान्वयव्यतिरेकाभ्यां प्रमाशोणहरीनेन प्रतिबंधरिनुत्तरमिति निरस्तं वेध्यं
पित्तादभावादिति। न च न्यायनये गुणहेतुत्वस्याव्यर्थकत्वात्तैनैवान्यथा सिद्धो पित्ताद्यभावस्य हेतुत्वे मानाभाव इति वाच्यं। भूयोवयवेंद्रियसंनिकर्षस्यैव
पीतसत्वे शंखादौ प्रमानन्नवतीति किं तु पीतधर्मिता तस्याप्यपेक्षत्वात्। न च तस्मात्प्रवृत्तत्वेति बंधकेति वाच्यं। धर्मितानकालेन तत्सामग्र्यभावेपि स्यु
त्यप्रमानुपपत्तेः। ननु व्याप्तिविशेषस्यैव हेतुत्वमित्यत आह। अपि चेति। नवा दोषे वेति। हेतुहेतुमद्भाव इति शेषः। व्यभिचारादिति। तत्तद्वीजव्यक्ते
स्तत्तद्वीजव्यक्तित्वेनैव तत्तदंकुरं प्रतिप्रयोजकत्वेंकुरजातीयं प्रति बीजजातीयस्यैव बीजत्वेनापि प्रयोजकत्वया बीजत्वस्याप्युपस्करणीयत्वात्। वृंते विनापि कु

तत्प्रयुक्तविशेषाङ्कुरव्याप्तिविशेषस्योत्पादप्रसंगेन व्यभिचारप्रसंगात्स्यापि॥ अन्यत्रसंगाच्चेत्। बीजे सत्यपि वीजत्वव्याप्तिव्यह्वीजव्याङ्कुरोत्पत्तेरहेतुत्वापत्तेस्तस्य
क्रिमत्वमात्रस्य। तयाप्याविशेषास्त्वाद्यपि॥ अनुगतमिति। यथा चैतन्नथाप्येकत्वाद्यते। घटज्ञानजायमिति। अत्र यद्यपि घटज्ञाने घटेन्द्रियसन्निकर्षो निमित्तत्वेन हे
म कु तुः किंतु विषयेन्द्रियसन्निकर्षत्वेनैव तथापि तद्विजातीयघटज्ञानं तत्र घटेन्द्रियसन्निकर्षो विजातीयो न वतो वेति न दोष इति भावः। स्वविरोध्यनुभवेति। अत्र
जातीयपदस्मार्थान्तरनिरासाय अप्रमाप्रतिबन्धकत्वव्याप्तिविशेषस्यानुकूलत्वेपि प्रतिबन्धकजातीयत्वाभावेनान्यनिकृष्टसाधनमित्याहुः। घटादौ स्वावि
॥१६॥ रोध्यनुभवाप्रमितैव व्याप्यतामिति स्यादित्यत आह। अनुभवेति। नित्यप्रमात्वमिति। नन्वत्रापक्षे साध्यसिद्धिं विना बाधकं विनेत्यसिद्धं तत्र दोषवतो वच्या
तुस्येवगमकत्वे शेषवैयर्थ्यापत्तिरिति चेत्॥ ॥मेवाहुः॥ अवच्छेदकं तत्र दोषपदकार्ये नाधिकरणवृत्तित्वरूपबाधकाभावे सति स्वावच्छिन्नकार्यताप्रतियोगिकत्वरण
16 सं भवस्य बाधकाभावे सति कार्यमात्रवृत्तित्वाद्यप्युपेः। तथा च सत्यत्ते नाविशेषणाद्यपेनीलघटत्वे पदानित्यतानत्वादौ चव्यभिचारेनिरस्तेज्ञानत्वादौ व्य
भिचारवारणायाग्रिमपदं॥ एवमपि बाधकान्तरेण कस्यचित्कार्यतानवच्छेदकतया परिशिष्टाभि चारशंकान्तरा तदभावेनापि हेतुर्विशेष्यः। ननु बाधकसामा
न्याभावो हेतुविशेषणं येनोवरोध्यवैयर्थ्यं स्यादिति तद्ध्येयं। नन्वेवमपि ज्ञानत्वादौ नित्यवृत्तितया स्वावच्छिन्नकार्यताप्रतियोगिककारणासंभवात्पूर्वप्र ॥१६॥
तीकेनैव व्यभिचारवारणाच्छेषवैयर्थ्यमेवस्यामेवेति चेत् न। स्वावच्छिन्नकार्यमात्रवृत्तिकार्यताप्रतियोगिककारणासंभवस्य विवक्षितत्वात्। स्वावच्छि
व ५ न्नकार्यमिसमवायित्वानंतद्वित्त्वकार्यताप्रतियोगिकारणासंभवे स्वस्तित्वात्। आत्ममनोयोगादेस्ताहृशकारणस्य संभवादिति। न नु तथाप्यत्रैव बाधः। अनित्यप्र
मात्वादितदाकार्यतावच्छेदकं स्यादिति तदवच्छेदककार्यताप्रतियोगिककारणातावच्छेदकं किंचिदकं स्यात्तात्नचतदृष्टि। तत्र दुःखोत्पतुगुणत्वस्यैकस्यत
थाभूतस्याभावात्। तथा च हेतोर्विशेषणासिद्धिरिति। एवं च दोषत्वस्यापि तथाभूतस्याभावात्प्रमात्वमपि न कार्यतावच्छेदकमिति दृष्टान्तोपि साध्य
विकल इति चेत्॥ ॥अत्र वदन्ति। एकमनुगतं नास्त्येव। तथा चेत्थमनुमानं। अनित्यप्रमात्वं स्वाधिकरणमात्रवृत्तिधर्मावच्छिन्नकार्यताप्रयोजकप्रमात्रवृत्ति।
स्वाधिकरणमात्रवृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयप्रमात्वानुत्पादककार्यमात्रवृत्तित्वे सैवातः। अप्रमात्ववदित्यवतारतयोजिता। तन्न॥
संदिग्धासिद्धेः॥ तत्र बाधकान्तरात्सत्वादाहुः॥ ॥४॥ यत्तु विशेषणावृत्ति विशेषणाज्ञानत्वमनुगततत्तद्धेतुतावच्छेदकं। न चात्र मानाभावः। अन्यथा विशिष्ट

यत्तु घटत्वमात्राभ्यां बाधासिद्धेः साधनयोः उद्दृष्टासिद्धाः साध्येमात्रपदहरमीलघटत्वेषा।
हेतौ॰ प्रमात्रपदं हेतौ ४ स्वरूपासिद्धिः पावलेयांततोप मात्रपदं

दवके ५

ज्ञाने नैव सामान्यो विशेषणज्ञानत्वेन हेतुतया विशेषयोरपि हेतुहेतुमद्भावावश्यंभावात्। यत्सामान्ययोः यत्सामान्याभितिन्यायात्। न चा
भाववत्त्वस्य पूर्वानुपस्थित्या तस्यैव प्रकारत्वानुपगमे नतादृशिष्टाभाववृत्त्या तेव्यभिचार इति वाच्यं। सामान्यापेरप्ययं हेतुहेतुमद्भावानापत्तेरि
तियथाश्रुतएववृत्तिः साधुरिति। तन्न। लौहित्यस्य रिक्तत्या ऋत्यौहित्यसाक्षात्संबंधविषयके भ्रमे तत्र प्यव्यभिचारात्। लौहित्यरूपविशेष
णस्य परंपरासंबंधेन विशेष्यावृत्तित्वात्। न च तत्संबंधविषयकप्रमायां तत्संबंधेन विशेष्यावृत्तिपत विशेषणतावत्ज्ञानत्वेन हेतु
ते तैवाच्यं। एवं हि तत्संबंधविषयकतद्विशेषणताविशेष्यकप्रमात्वकार्यतावच्छेदकं तत्संबंधेन तद्विशेष्यावृत्तिविशेषणज्ञानत्वंका
रण नावच्छेदकं भिन्नानुगमे पर्यायं ते बाध एव किं च प्रतिबंधाप्रयुक्तत्वात् भ्रमाभावत्वविशिष्टप्रत्यक्षे तेव्यभिचार एव॥ अन्ये
तु साक्षात्प्रमायां याथार्थ्यं विशेषस्य वा कार्यस्य प्रमाहेतुरिति तन्मते प्रमासामान्येयथार्थप्रमासामान्यमीश्वरस्यैव गुणाः। य
दि शे[illegible]ध्योः कार्यकारणभाव इति न्यायादित्याहुः। तच्चिंत्यं। ग्राह्य प्रमामात्रस्यैतिप्रसक्तेः तथा यत्र यत्र याथार्थ्यं तत्र तत्प्रमाहेतुर्वाच्यः। तथा च तज्ज्ञानाप्रमायां
तत्तयायाथार्थ्यप्रमाहेतुरित्यननुगमात्। प्रमामात्रेनानुगतो गुण इत्याग्रिमग्रंथविरोधाच्च। भ्रमप्रमात्वदृष्ट्यैः तेसाध्यानैकत्यस्य तथा यानुद्वाराच्च। नचाप्रमात्व
पदेनतत्तद्प्रमात्वपरमितिवाच्यं। एवं प्रमात्वपदमपि तत्तत्प्रमात्वपरमेवास्तु किमननुगतगुणाग्रहेण। न चैवमननुगतस्य प्रमाहेतुत्वे इति पूर्वग्रंथ
विरोध इति वाच्यं। प्रत्यक्षादिप्रमायां भूयोवयवसंनिकर्षादेः प्रत्येकमननुगतस्यैव हेतुत्वमित्येवं परत्वेनाप्युपपत्तेः। तस्मादनित्यप्रमात्वपदेना
नित्यसाक्षात्कारप्रमात्वादिकमेवविवक्षितमित्येवतत्त्वमिति। केचित्तु यथायथं गुणत्वमननुगतं तत्प्रमात्वमपि। तथा च यदनित्यप्रमात्वं कार्यता पा ६
वच्छेदकं तत्र चादृष्टरूपोनुगतो गुण इत्याहुः। प्रत्येकेति। तथा चावच्छेदकांतरोपपन्नकार्यताधिकरणवृत्तित्वरूपबाधकस्य सत्त्वान्नात्रव्य
भिचार इति भावः। परानित्यज्ञानत्वादीति। परानित्यज्ञानत्वादेरखावच्छिन्नकार्यताप्रतियोगिककारणतासमव्याप्तरूपबाधकसत्त्वा
न्नव्यभिचार इत्यर्थः। अस्त्वेवेति। तथा च परानित्यज्ञानत्वादेरकार्यतावच्छेदकत्वरूपसाध्यस्यापि सत्त्वान्नव्यभिचार इत्यर्थः। एतच्चाभ्युपेत्योक्तं
वस्तुतो दृष्टस्य कोपि मात्रहेतुत्वेपि परानित्यज्ञानत्वादेस्त्रिरूपतत्कार्यतावच्छेदकत्वे मानाभावः। अन्यथा प्रकृतानुमानेपि तेनैवार्थांतरं स्यात्। न च प्र
कृतानुमाने दोषाभावेनार्थांतरं गौरवात्। अनुगतस्य तस्याप्यभावाच्चेत्याहुः। अनित्येति। अनित्यज्ञानत्वभिन्नकार्यतावच्छेदकधर्मत्वादित्यर्थः॥

नत्वेनो
मन्यमतेतस्यपक्तेतरत्वपर्यवसानादनुपाधित्वं। मन्यमतेतस्यपक्तेतरत्वेपिवाधोन्नीतपाधित्वादिति भावः॥ भगवदिति। नच २
वाच्यं पक्षमात्रवृत्तीति। अत्र वाह्यत्वपदं संपातायातं। एवं रजतभ्रमादवन्नीत्यत्रापिरजतपदं तद्यैवेतिध्येयं। चाक्षुषप्रमात्वस्य नीलत्वरत्वव्याघसमाजमीहं मेचोपप
वावत्वे रूकलेसाधकंकिंत्यामितिमेचिदाहुः॥ तदिति। नैयायिकस्येत्यर्थः॥ तवतन्यप्रमामात्रेस्यपक्षत्वाद्दीपुरप्रमायाअपिव्याकर्ष्येणेनपक्षमात्रव्यावर्तमहत्वमावे म क्तु पु २
नपक्षेतरत्वाभावादितिभावः॥ ममवत्पक्षस्येति। नचैवन्मतेसपक्षत्वाभावः वाधोन्नीतेपक्षस्यैवसाध्यसपक्षत्वादितिभावः॥ उक्तमिमानैदोषाभावेनाधीतरस्यादितिशंके ते
तोनन्विति। एवं चनस्वतस्त्वहानिरित्याह। आगंतुकेति। असाधारणेत्यर्थः। मुरारिमतमाशंक्यनिराकरोति। यत्विति। प्रतिवंधापरिहरति। नेति। वेराग्यमाशंक्यते
॥२१॥ अयेति। ननुज्ञानेसद्दर्पविषयत्वनियमइत्तीववनास्ति। तथाचासदर्थमात्रविषयकज्ञानेसदर्थविषयत्वाभावः प्रयोजकः। संभवेदोवेत्यतआह। प्रमायाद्रितिस्य भा
सतत्वात्। तेनैरात्मारूयात्याद्यरूयातोधर्मीदः स्वतएवमानादसत्त्वविषयत्वं। तन्नमसिद्धमितिभावः॥ हेतुभावादिति॥ असदर्थविषयकारणाभावरूपहेतुभावा
तरकवस्य वात। भावेवासदर्थविषयतेवनत्रनस्यादितिदोषाभावोव्यभिचारीतिभावः॥ व्यभिचारमुद्धरति। सदर्थमात्रेति। प्रतिवंदिमाह। नहीति। कविरिति॥ ॥२१॥
धर्मीर्मयोरोषः स नधर्मीदोषाभावासत्वेपिधर्मीदोषाभावात्सत्यत्वेस्यादेवेतिभावः॥ नाविति। गुणान्तरभावात्वित्यर्थः। व्यभिचारोद्धारायपितादेः स्वप्र
माप्रति दोषाभावत्वेसाधयितुमाह। अयेत्यादि। कश्चिद्दोषदत्तो नोपसंभवासूलेति। स्वप्रमायामपिहेतुत्वेनअमाहेतुत्वासंभवादित्यर्थः। अत्राप्नेति। दोष
त्वेज्ञातेदोषाभावत्वेनप्रमाहेतुत्वग्रहः। तत्ग्रहेचततद्धितत्वदोषत्वग्रहइत्यन्योन्याश्रयइत्यर्थः। अप्रत्यक्षेति। धारावाहिकपरामर्शेतरत्वप्रत्यक्षप्रति
बंधकस्येत्यर्थः॥ तस्मादिति॥ अन्यथागतिकत्वात्। ननु मेनैवकश्चिद्दोषः। कचिदप्रमाणांकश्चिद्दोषत्वाभावः कदाचित्प्रमायांहेतुत्वेऽच्यइतिभावः॥ स्या
देतदिति। अत्रप्रमाणिनिश्चयस्पष्टीकृतः। प्रमात्वेनकत्वमात्रस्यवक्तामारानन्वयव्यतिरेकप्रयोजकत्वादित्याहुः॥ प्रमामकुर्वतिज्ञानहेतुस्तोमेमंडूकवसा
षा४ जनसमदोषाभावेवंशाद्रमेतिस्वतन्त्रान्वयव्यतिरेकप्रयोजकत्वादित्याहुः॥ प्रमात्वकेदर्शनायतदुक्तमित्यर्थः॥ ननुमंडूकवसाद्यपदोषसत्वेपित्वचावंश
प्रमोत्पत्तेर्नदोषाभावः प्रमाहेतुस्तत्रैवव्यभिचारादित्यतआह। मंडूकवसेति। प्रमाप्रतिदोषाभावस्यव्यभिचाराशांकेतावगोरवमिति। तदसत्त्वरीति॥
विशेषदर्शनामत्वेगौरवमितिप्रमाभिदेरित्यर्थः॥ मोप्रमात्वेव्याप्यधर्मावच्छिन्नकार्यताप्रतियोगिककारणतोऽप्यतंगुणात्वेअस्यचभ्रमप्रमासा
धारणतावदेवसावृत्तिवैशवसाक्षात्कारत्वावच्छिन्नेहेतुतानतयात्वभित्यादितावदेवोति। व्यभिचारवारणायतावद्वृत्तीति विशेषणंतुवाच्या
वरूपवमित्याह॥ नवापीति। यद्यपितावद्वृत्तिप्रमात्वस्य। प्रमात्वव्याप्यत्वान्तरवच्छिन्नकार्यताप्रतियोगिककारणतोऽपयत्वाद्दृश्यगुणत्वेभक्त्ये
वतयापितादृशसाक्षात्कारमात्रप्रत्येवोन्वयव्यतिरेकाचुविधायित्वानुपपत्तेः दृशसाक्षात्कारत्वहेतुताकछेदकमितिभावः॥ नचतावद्वृत्ति

स्मा

यो गुणत्वाव्याप्यजातिमत्त्वात् अभिचार इति वाच्यं तावद्रूपवत्त्वविशेषसमानाधिकरणविषयकदेशमात्ता मारे सन्नानीप संयोगस्यहे
स्थूलत्वस्य वस्त्वविशेषके शेषायमिति मुमसे भवादु भिचार इति वाच्यं तावद्रूपवत्त्वविशेषसमानाधिकरणविषयकदेशमात्ताकारे सजातीयसंयोगस्यहे
तुल्यमित्युर्थीता पदार्थान्तरस्वरसारेवाह॥ नत्वापीति भाववत्त्वेनेति पदार्थविभावत्वमतिप्रसक्तेन यापि भावत्वं भावधर्मो विशेषदर्शनेत्वमिति भावः॥
ननु विशेषादर्शनाभावो विशेषदर्शनत्वेनैव हेतुः ननु तदभावत्वेन गौरवात् तत्तथा चस्तिद्धं तस्यानुगतत्वमित्याशङ्कते राहे॥ किं चेति॥ न चाविशे
षादर्शनस्य तत्र दोषत्वमिति पूर्वेयं च विरोध इति वाच्यं। मतान्तराभिप्रायेणोक्तत्वात्। एतस्मात् दृष्टविशेषस्यालङ्घ्य शक्तिकस्य तत्र दोष
त्वं संस्कारविशेषस्य वक्ताहुः॥ ॥ अन्यथेति विद्यायुक्तत्वेऽनुमोत्कर्षदर्शनाच्छेषामवश्यं हेतुत्वमिति भावः॥ यत्तु अन्यथा पूर्वं विप्रतीतत्वव्याप्यधर्मरव
त्वादि विशेषदर्शने सति प्रत्यक्षत्वापत्तेव शान्तीतः शंखस्याप्रमाणस्यात्यादिरिति। नन्वात्रापि विशेषादर्शनविविशेषस्य तत्र हेतुत्वात्
त मतापाटीति॥ तत्त्वायी विशेषेत तत्कारणकस्य हेतुत्वमिति भावः॥ अन्यथापि तिरोहित स्यस्यतात्पर्यमबुद्धा शंकते। सत्वेति। तात्पर्येसुरयति। पित्तादी
ति गन्धोर्यो किं चेति। तथा चोपनायेभावएवतत्र हेतुरिति भावः॥ नत्वेति। विशेषदर्शनस्य हेतुत्वापत्तेर्भ्रमनवस्थानादित्यर्थः। अदोषवे
अप्रमासाधारणकारणस्य दोषत्वादित्यर्थः। यद्यपि प्रमांशे परेणापि दोषजन्यत्वानंगीकारादाशंके पमनुपपन्ना तथापि भ्रमसाधा
रणदोषजन्यत्वात्प्रमायां न पर तत्त्वमित्याभिमानेनाशंकेयमिति ध्येयं। नन्वेवं सति तत्प्रयोजकेन्द्रियसंनिकर्षजन्यत्वाद्भ्रमस्य तावे
नत्याद्रित्याह तन्त्राह। अप्रमासात्कारित्वे चेति। एवं दिन्द्रियसन्निकर्षस्य तत्प्रयोजकत्वे गौरवमिति भावः॥ ननु विषयस्य तद्दजन्यत्वेपि तत्त्वदेषत्वाव
देनतज्जन्यत्वस्यादित्यत्राह। अप्रमांशे चेति। तत्र मते स्वप्नकाशादंशविहायदंशेन्द्रियसन्निकर्षजन्यत्वं तदंश एव साक्षात्त्वं। अत एव प्रत्यभिज्ञायामेकांशेसाक्षा
त्वे भ्रमपरांशे स्मरणत्वं न्यायनये च भ्रमस्य विशेष्यांशे स्मरणरूपसन्निकर्षजन्यत्वात्प्रमात्वं स्यादिति दूषणं बोध्यं। तद्वैतुकइति। दोषस्य साक्षात्त्वेहेतुत्वे भ्रमानु
मितेरपि साक्षात्त्वापत्तिरित्यर्थः। तत्र दोषत्वस्य तथात्वे ननुगम इति भावः॥ ॥ किंतु तत्प्रमायामिति॥ ननु तथाप्यननुगम एव। भूयोवयवेन्द्रियसन्निकर्षस्य
प्रत्यक्षप्रमामात्रे हेतुत्वात्। तेनचित्रापि शब्दात्मादि प्रत्यक्षप्रमादर्शनात्। नापि पर्याप्तिलिंगपरामर्शोनुमितप्रमामात्रे। गंधप्रागभावावच्छिन्नघटप
क्षकगंधानुमितेर्बाधानवतारदशायत्राप्यो: प्रमात्वापत्तेः। सादृश्यधीस्तुवैधर्म्योपमितावेवनास्ति। प्रमुक वाक्यादिवाक्यजप्रमायां वाक्यार्थतानं च

व्यभिचारि। न चेश्वरीयं तत्तत्रापि संभवतीति वाच्यं। अन्योन्याश्रयात्। प्रमायाः गुणजन्यत्वे सिद्धे वैदिकप्रमाहेतुवाक्यार्थज्ञानरूपगुणस्याश्रय
भक्त त्वेनेश्वरसिद्धिः तत्सिद्धौ च तदीयवाक्यार्थज्ञानजन्यत्वात् शुकादिवाक्ये व्यभिचाराभावेन प्रमायाः गुणजन्यत्वसिद्धिरिति॥ अत्राहुः॥
यथार्थप्रमामात्रे नानुगतो गुणस्तथापि प्रत्यक्षप्रमामात्रेऽपि किंतु स्वस्वव्याप्यविशेषगुणादि प्रत्यक्षप्रमामात्रे सहेतुः। तावतापि गुणहेतु
४ त्वसिद्धेः। न च प्रत्यक्षे च तत्तत्प्रमा चक्षुरादिवैन्द्रियसन्निकर्षो विशेषः सामग्रीति नातिप्रसंगः। ननु स्त्रीसत्वात् दोषाभावस्य हेतुत्वं स्यात् गु
॥२॥ णसत्वेपि तस्यावश्यकत्वात्। अत एव भूयोवयवेन्द्रियसन्निकर्षसत्वे तदभावेपि शंखेन पीतत्वप्रमेति चेत् न। तदुक्तं बलप्रमोत्क
र्षात्। उक्तप्रत्यक्षप्रमादिविषयस्यैवानुगतत्वेत्याहुः। एवं चात्मादिधर्मिकप्रमायामन्यत्रापि यथार्थगुणत्वेन वाच्यं। यथापीतिं
गत्वानपदेन पक्षतावच्छेदकावच्छेदेन साध्यवत्ता पक्षे लिंगज्ञानं विवक्षितं। तस्य च गंधप्रागभावावच्छिन्नपक्षके
गंधानुमितावभावाद्दोषः। वस्तुतस्तु बाधितत्वप्रमातद्गुण इति बाधग्रंथे व्यक्तं। प्रकृतं। तावच्छेदकावच्छिन्नसाध्य
प्या ८ कप्रमायां पक्षीयपरामर्शो गुण इत्याहुः। सादृश्यदर्शनं च सप्रतियोगिकधर्मपरं। सादृश्यगताभीतिदेशवाक्यपूर्वकोपमितिप्रमा ॥२॥
यां सादृश्यपर्याप्तिज्ञानं गुण इत्याहुः। शुकादिवाक्यजप्रमायां ईश्वरीयप्रमामादायैव व्यभिचारः। न चैवमन्योन्याश्र
प्या ९ य इति वाच्यं। एवं हि घटादौ व्यभिचाराभावात्कर्तृकार्ययोरपि हेतुहेतुमद्भावो न गृह्येत। ईश्वरमादाय व्यभिचाराद्धेरन्योन्या
श्रयप्रसंगात्। यदि च कर्तृविशेषकार्यविशेषयोरन्वयव्यतिरेकाभ्यां कर्तृकार्यसामान्ययोः कार्यकारणभावावधा
रणान्नोक्तदोषस्तदा शाब्दप्रमाविशेषवाक्यार्थप्रमाविशेषयोरन्वयव्यतिरेकाभ्यां तत्सामान्ययोः कार्यकारणभावावधारणान्नो
क्तदोष इति तुल्यं। वस्तुतो यथार्थप्रमाविशेषयोरन्वयव्यतिरेकाभ्यां तत्सामान्ययोर्यथार्थज्ञानमेव तत्र गुण इत्यग्रे ग्रंथकार एव वक्ष्यति। ...
प्रत्यक्षप्रमात्वमनुमितिप्रमात्वं वा नैकमनुगतं। प्रत्यक्षत्वादीनां तत्तद्व्यक्तित्वेनाननुगतत्वात्। तथा चात्रानुगतगुणचिंतापि नास्ति। किंतु यद्रजतत्वविशिष्टरजतप्रका
रकज्ञानत्वादिरूपं प्रत्येकमनुगतं तत्र चानुगतमहत्त्वं स्वरूपं वाच्यमन्यथा यथार्थगुणत्वेन बोध्यमित्याहुः॥ विशेषेति। व्याप्यदर्शनमित्यर्थः॥ ननु

ज्ञा।
तद्धेतोरेवेति न्याये न विशेषदर्शनं हेतुरेव तद्धेतुरिति व्यापकप्रत्यक्षमेव व्याप्यमपि विषयीकरोति। ननु व्यापकप्रत्यक्षात्पूर्वं व्याप्यविषयकं ज्ञानमित्याशंक
ते। नैव तावता व्यतिरेकादिति। विशेषदर्शनहेतुव्यतिरेकादेव प्रत्यक्षाभावोपपत्तेरित्यर्थः। अन्यापीति। विशेषदर्शनहेतुत्वं इत्यर्थः। ननु विशेषदर्शनहेतुरपि विशेष
दर्शनान्तरमेव तत्र चावविशेषदर्शनहेतुहेतुत्वानुपगमे विशेषदर्शनहेतुत्वैवानुपगतेत्यत आह तत्रापीति। अनवस्थाभिया विशेषदर्शनान्तरं न तद्धेतुरिति नो
न्यायेनो विशेषदर्शनहेतुत्वमित्यर्थः। एवमिति। व्याप्यदर्शनसामग्र्या जन्यत्वे प्रत्यक्षस्य व्याप्यविषयता नियमेनानुव्यवसायेन प्रामाण्यव्याप्यधर्मेऽपि नये
प्रामाण्यसंशयो न स्यादित्यर्थः। यद्यपि व्याप्यवद्विषयकत्वानवगममात्रमनुव्यवसाये न शक्योपनयेत्तत्र न प्रामाण्यव्याप्यं यत्र प्रामाण्यव्याप्यं व्याप्यवद्दृश
ष्यकत्वं तत्रानुव्यवसायेन शक्योपनयेतः प्रामाण्यग्रहापत्तेः। किंच विशेषदर्शनस्यापि प्रत्यक्षहेतुत्वे उक्तदोषतादवस्थ्यं। अनुमिताविव बाधकाभावेन
व्याप्यदर्शनोपनीतस्य व्याप्यस्य व्यापकप्रत्यक्षे विषयत्वनियमात् तथा व्याप्यानुगमेन विशेषदर्शनहेतूनां न हेतुत्वे इत्यनुपदं वक्ष्यमाणदूषणेना
त्यंपीति बोध्यं। ननु तथापि विशेषदर्शनं व्यापकप्रत्यक्षमात्रे कारणं वाच्यं। तथा च व्यभिचारात्र तस्य हेतुत्वमित्याशंकते। तथापीति। प्रत्यक्षवि
शेषे तस्य हेतुत्वं ब्रूमो न तु प्रत्यक्षमात्रे इति न व्यभिचार इत्याह। संशयेति। यद्यपि संशयोत्तरप्रत्यक्षमात्रेऽपि विशेषदर्शनं हेतुः अंधकारे घ न
टसंशयोत्तरप्रत्यक्षस्य तद्विनाप्यालोकसमवधानमात्रेणैवोपपत्तेः। तथापि यत्र विशेषादर्शनादिदोषाधीनः संशयः तदुत्तरप्रत्यक्षे त
स्य हेतुत्वमुक्तं स्थले च व्यंजकाभावाधीनः स इत्यर्थः। ननु संशये सति विशेषदर्शनविरहदशायां संशयानुत्तरप्रत्यक्षस्थले यत्र तत्सा
मग्रीसासीत्तनवा। न चेत्तर्हि तद्विरहादेव तत्रैव प्रत्यक्षानुत्पादोपपत्तौ नैव विशेषदर्शनविरहादिति न तत्र तस्य हेतुत्वं आद्ये प्रत्यक्षोत्पादप्रसंगो दुर्वा
र एवाश्रयतत्सामग्र्यां सत्यामपि संशयेन प्रतिबंधान्न तदुत्पादप्रसंग इति चेन्न। यतो हि संशयस्य प्रमाणमपरिपंथित्वात्। तत्पारिपंथ्ये च
ते स्मिन्सति विशेषदर्शनादपि प्रत्यक्षं न जायेतेति चेत्॥ ॥अत्र वदंति॥ यत्र संशयस्तत्र विशेषसंनिकर्षो रिक्तो विशेषदर्शनं विना प्रत्यक्ष
ते नजायेत स्मिन्सति उत्पद्यत एव। यत्र तु न संशयस्तत्र तेनैव नैव तत्तज्जायते इति प्रत्यक्षे विशेषदर्शनविरहो विशेष्यसंशयस्य प्रति
बंधकत्वं तादृशस्य प्रतिबंधकीभूतसंशयस्याविरहः प्रत्यक्षे विशेषदर्शनविरहे सर्वत्र कारणं संचाविशेषदर्शनसहकृतसंशये सतिव
ति३

शेषदर्शनविरहस्य विशेषणस्य विरहात् संशयविरहे विशेषादर्शने च सति विशेष्यविरहात् संशयविरहे विशेषदर्शने च सत्यपि तद्विरहात्
वैशिष्ट्यविशेषः। नन्वेवं विशेषदर्शनस्य प्रत्यक्षे हेतुत्वं न स्यात्। विशिष्टाभावसंपादकत्वेनान्यथासिद्धत्वादिति चेत् न। अग्रे नन्वेवं तत्स्य
मकू तथात्वेऽपि विशेषणाज्ञानत्वेन हेतुता ता। एवं विपर्ययेऽपि विशेषदर्शनविरहे विशिष्टस्य च प्रत्यक्षप्रतिबंधकत्वमिति तस्मिन् सत्यपि विशेषदर्शनात् प्रत्यक्षं तज्ज्ञायत एव
तस्य च तत्र विशेषणाज्ञानत्वेनाप्युपयोगित्वात् कारणत्वं। नन्वेवमपि विशेषदर्शनस्य संशयाद्युत्तरप्रत्यक्षे तत्त्वेन न हेतुत्वं किंतु विशेषणाज्ञानत्वेनैवातथा
॥१९॥ च तस्य प्रमाया असाधारण्येन कारणत्वाभावात् गुणत्वं भिन्नमिति चेत् न। संशयाद्युत्तरप्रमायां प्रमारूपविशेषदर्शनस्य विशेषप्रमात्वेन रूपेण कारणत्वात्
तथैव गुणत्वात्। भ्रमस्थले विशेषदर्शनस्याप्रामाण्यात्। न च तत्रापि तस्य विशेषणाप्रमात्वेनैव कारणत्वं विशिष्टप्रमायां विशेषणज्ञानस्य तद्येनकारणा ॥१९॥
१ त्वादिति वाच्यं। विशेषणज्ञानस्य प्रमात्वेऽपि विशिष्टज्ञानप्रमात्वानियमादिति। अत्रेदं चिंत्यं। संशयस्थले विशेषदर्शनविरहसहकृतसंशये न प्रतिबं
धाद्युत्पत्तौ दृष्टत्वात् संशयोत्पत्तिकाले प्रत्यक्षानापत्तिः। न च संशयसामग्र्याः प्रतिबंधात्तथा यत्तन्नोपत्र प्रतिबंधकमिति न्यायेन। प्रतिबंधकाभाव
स्य कार्यसहभूतस्यैव हेतुत्वाद्वेति वाच्यं। एवमपि धर्मिज्ञानकाले दैवात् पुरुषत्वादिज्ञानवतः पुरुषत्वादिनिश्चयापत्तेः। संशयस्य तत्सामग्र्या वा तत्
हानीसंभावात्। ननु दोषस्य प्रतिबंधकत्वान्न तदापत्तिरिति चेत् हे तेवं ग्रावरणपक्षत्वात् संशयकालेऽपि तत एव दोषात् प्रत्यक्षानुत्पत्तिरस्तु। किं
संशयस्य प्रतिबंधकत्वाभ्युपगमेनेति। विशेषदर्शने सति विशेषादर्शनरूपदोषविरहान्निश्चयोत्पत्तिः। ननु निरुक्तविशिष्टाभावस्य न प्रत्यक्षे हेतु
त्वं मानाभावात्। नन्वेवं विशेषादर्शनरूपदोषसत्वे संशयानुत्तरपुरुषप्रत्यक्षमपि न स्यादिति चेत् न॥ फलबलेन तस्य क्वचिद्दोषत्वकल्पनात्। न
नूक्तपुरुषाद्यभिचारसंशयस्याप्यप्रत्यक्षप्रतिबंधकत्वं न स्यात्। ग्राह्यसंशयत्वादिति चेत् न। व्यभिचारसंशये सति विशेषदर्शनं विना न व्या
प्तिग्रह इति तत्त्वात् तस्य प्रतिबंधकत्वोक्तिः पारिभाषिकी। ननु कारणीभूताभावप्रतियोगित्वेन स्यादिति॥ ननूक्तरूपप्रत्यक्षे विशेषदर्शनं व्याप्यवत्त्वदर्श
नमेव वाच्यं। तथा च व्याप्यवत्त्वपुरोवर्तिनि सध्याप्युत्साभावावगतौ संशये निवृत्तेऽपि पुरुषप्रत्यक्षं न स्यात्। तद्धेस्थानविशेषदर्शनात् तन्निवृत्तौ
तन्न स्यादिति चेत् न। संशयविरोधिदर्शनत्वेन तस्य हेतुत्वात्॥ ॥ तद्दर्शने तु वेति। परे त्वेवं व्याप्यदर्शनहेतुत्वे नैतूक्तानमप्यनुगमतया पित्वा

घटाद्याप्यदर्शनत्वेनैव हेतुत्वं न तु व्याप्यदर्शनहेतुत्वेन गौरवादिति भावः। अन्यत्रेति। विषयभेदस्येत्यर्थः। अत्रेति समानविषयेतु मिमांसाविरहस्तत्व
तप्रत्यक्षसामग्रीप्रतिबंधिकेति भावः। यत्तु एतन्नाविरहादत्रेनानुमितिरिति तत्रबाधकमनुमितेत्वेनहेत्वाभावाख्यानावसरे वक्ष्यामः। अत एवोत। क्वचि
तज्ज्ञानेविशेषदर्शनस्यजनकत्वाद्रष्टव्यम्। ज्ञानबाधकमित्ताविशेषदर्शनजन्यत्वेनप्रतीतेयद्भवतितदेवस्वरूपस्यबाधकं भवतीत्यर्थः। अत्रवि
शेषदर्शनजन्यंबाधकमित्येववक्तव्येऽतीतत्वेनज्ञातंतयेत्यभिधानेऽस्याद्रष्टस्यबाधकत्वेनुभावः। प्रमाणेतिमिति द्रष्टितो। ननु तत्त्वेनेवज्ञातस्य तत्त्वं।
बाधकत्वेहि ज्ञानस्याबाध्यज्ञानोपदर्शितार्थोत्तेव न तयोत्याद्वेन तत्पुवर्त्तनीयव्यवहारविपरीतव्यवहारप्रवर्त्तनसामर्थ्यमेवा तच्चाविशेषदर्शन
जन्यत्वेपिज्ञानस्यस्वरूपसत एवभवतीति ननु तस्य तत्त्वेन ज्ञानमप्यपेक्षितेमानाभावात् गौरवाता। तत्त्वेनाज्ञातस्यकोचिरबाधकत्वापाताश्रेत्याहुः॥
न्वयव्यभिचारमाह। किं चेति। एवं चेति। वाक्यार्थज्ञानं विनापि तत्त्वदृष्टान्तादेवोच्चरितमित्यर्थः। प्रमाणेति। वचनवाक्यार्थज्ञानं नैवेत्यर्थः॥
वक्तृज्ञानेति। अत्रवाक्यार्थो न प्रकृतेन वाक्यार्थः किंतु संसर्गमात्रंघटपदार्थसंसर्गभ्रमविषयसंसर्गवाच्य एवात्यंशाब्दो न प्रमाणमिति न तत्रतद्गुणापेक्षेति भावः
।नन्वत्रयत्र किंचित्वाक्यार्थोवाच्योयोग्यत्वानवाच्योऽतिप्रसंगात्तत्र चप्रकृतप्रयोगकारणीभूतवक्तृज्ञानविषयवाक्यार्थोवाच्योवाप्रकृतवाक्यार्थोवा
वासावाच्यात त्राद्येआह। घटवतीति। त्वयाबसमानविषयत्वेनाह। यघटसंसर्गधीरेवतत्रहेतुरिति नियतयोग्यतासत्वात्तत्प्रमाणमेवेतिभावः।
अन्त्येत्वाह। किंचेति। तथा च प्रामाण्यमस्यपदगुणामितिभावः। शाब्दप्रमायां(गु)। विशेषदर्शनेपीति। श्वेतत्वव्याप्यत्वेन शंखत्वदर्शनेपीत्यर्थः। यदि
शेषेति। भ्रमविरोधिविशेषदर्शनत्वेनहेतुत्वं। शंखत्वदर्शनं चेत्तथेति नतत्रश्वेतत्वप्रत्यक्षानुत्पादेप्यन्वयव्यभिचार इति भावः। ननु शंखत्वद
र्शनं कुतो न भ्रमविरोधीत्यत आह। उत्पन्नभ्रमे चेति। उत्पन्नविपरीतदर्शनमित्यर्थः। तेन श्वेतत्वव्याप्यशंखत्वप्रत्यक्षसत्वादपीतत्वानुमिति
सत्वाच्च नोक्तदोषतादवस्थ्यमिति ध्येयं। केचित्तु आरोप्यकोटिसमानाधिकरणत्वेनानिश्चीयमानस्य विशेषस्य दर्शनं विरोधि शंखत्वं
चारोप्यपीतत्वकोटिसमानाधिकरणत्वेनैव निश्चीयत इति न तद्दर्शनं तद्विरोधीत्यर्थः। अन्ये तु यदि शेषादर्शनजन्यापीतभ्रमस्तद्विशेष
दर्शनं तत्तद्भ्रमोत्तरमुत्पद्यते हेतुः तथैवान्वयव्यतिरेकदर्शनात्। पीतः शंख इति। भ्रमस्तु न शंखत्वविशेषादर्शनजन्यः। किंतु पित्तादि

जन्य एवातथात्वं न तत्र शंखत्वदर्शनादपीतत्वप्रत्ययत्वावकाशः। तत्र तस्याहेतुत्वादिति वदंति। नानुमित्यादिरिति। नानुमित्यादिप्रमेत्यर्थः। य
भक्त द्यपि परामर्शादेः विशेषस्य हेतुत्वे दिरूपसामान्यसामग्रीविरहादेव न तत्रानुमित्यादित्वं तथापि सामान्यकारणानां विशेषकारणत्वाविरोधात् यत्सामान्ये
यत्सामान्यं प्रयोजकं तेनैव विशेषस्य प्रयोजकत्वमिति न्यायेन प्रमानुमित्यादिविशेषे सत्यपरामर्शविशेषस्य हेतुत्वमिति भावः। वेदेति। तथाच
॥२०॥ नेष्टप्रसंग इति भावः। लाघवादिति। तथा प्रमात्वस्य लाघवेन प्रत्यक्षे हेतुतया नैकट्यार प्रत्यक्षप्रसंग इति भावः। अस्तु वेदे यथोप
गमवाद्यं वक्ता नो भ्रांत प्रतारक इत्याकारकप्रमायां भ्रमाप्रमावाजां व्यभिचाराद् हेतुत्वमेवेति ध्येयं। प्रमाणवत इति। वेदे यथाप्रमा वक्तृयथार्थगुण
१० जन्या शाब्दप्रमात्वादिति प्रमाणमत्रेति ध्येयं। ननु वाक्यप्रमाणस्य गौरवं पर्यायस्याहितत्वमाह। फलमुखत्वेति। गौरवं कल्पनाकालोपस्थि
तं गौरवं फलमुखं च गौरवमनुपस्थितमिति न पोषितं ततश्च तन्मूलं च प्रमाणमिति दृष्टान्ते दोषायेति भावः। स्वर्गादाविवेति। सुखत्वाव
च्छिन्ने शरीरस्यानन्यत्वकल्पने स्वर्गसुखोपशरीरकल्पनवदित्यर्थः। यथा स्वर्गोत्पादकमपूर्वं तत्सहकारि यत्तरं च प्रमाणमिति दृष्टा कल्प्यते तत
थेदं मोपकं विदाहुः यथाहुः। प्रमाणं कल्प्यदृष्टानि कल्पयानि सुबहून्यपीति। न च नित्यनिर्दोषत्वं विशिष्य शाब्दप्रमाप्रयोजकं तथा दर्शनादि ॥२०॥
त्याह। लौकिकेति। वक्तृस्यानित्यत्वेपि आनुपूर्वीघटिते लौकिकं वाक्यमनित्यं वेदे तन्मते आनुपूर्व्यपि नित्यैवेति लौकिक इत्युक्तं। ननु लौकिके वक्तृयोर्नि
र्दोषत्वमेव प्रामाण्यप्रयोजकं ननु नित्यत्वमपीत्याशंकते। अथेति। ननु वेदे प्रमाणाभावान्निर्दोषत्वमेव नास्ति कुतस्तस्य प्रामाण्यप्रयोजकमित्यत
आह। वेदे चेति। केचित्तु शाब्दप्रमाप्रयोजकज्ञानमुपपद्यते इति कृत्वा वधारणमस्याने इत्याहुः। अन्वयव्यभिचारमाह। किं चेति। एवं चेति। वाक्यार्थज्ञा
नं किंचापि तत्र दृष्ट्वाना देवोक्तिरिति मित्यर्थः। प्रमाणेति। वक्तृवाक्यार्थज्ञानपेत्वं नेत्यर्थः। वक्तृज्ञानेति। नाश्रवाक्यार्थे न पूर्वकतवाक्यार्थः किंतु संसर्ग
माबाधरामाव संसर्गभ्रमविषयस्तत्र बाध एवायं शाब्देन प्रमाणमिति न तत्र गुणापेक्षेति भावः। नन्वेवं यत्र किंचित्वाक्यार्थो बाधो योग्यता नवा या
श्रीतप्रसंगात्र तथा च प्रकृतप्रयोजककारणीभूतेव कृतानेन विषयवाक्यार्थाबाधो वा पूर्वकं नवाक्यार्थाबाधो वास्ता वा चात तत्रोदयेत्याह। घटवतीति। तथा वक्तमान
विषयत्वेनाह। येघटसंसर्गधीरेवतत्र हेतुरिति निरुक्तयोग्यता सत्वात्तत्प्रमाणमेवेति भावः। श्रुतोक्ताह। किं चेति। तथा च प्रामाण्यमस्तु सामिति भावः॥
शाब्दप्रमायां गुणस्य व्यभिचारमुक्त्वानुमितिप्रमायामाह। एवमिति। तत्रेति। कश्चित्त्वदुक्तं त्रिगोलं मिन्नुधर्मेणो वा दिज्जातिना शाब्यारोपेन हुपेत एवं गौत्वप्रतीति[illegible]त्यर्थः॥

त्रि ८ बा

संसर्गारोपादिति। गोत्वादिना तैरेव पदैः संसर्गारोप इति भावः॥ यद्वा पदैरन्यगवाभेदारोपो नेति पूर्वेण पक्षिकार्थः। साध्योपलिङ्गवदभेदज्ञानेनता
दात्म्यानुमितौ। तादृशलिङ्गसंसर्गज्ञानेन च साध्यसंसर्गानुमितौ हेतुः न यस्तु यत्र स्वबलात्तत्संसर्गारोपभ्रम एव जातस्तत्र दोषः स्यादेवेत्यत आह
पक्षिकार्थः। श्रुतेति॥ अन्वयाहार्यारोपं विना पदतात्पर्याभावात्तत्र च विषयाबाधात् प्रमारूप इति तन्मात्रापि गुणजन्यत्वमप्रत्यूहमिति ध्येयं।
न चैवं शुकादिवाक्यं वेदतुल्यं स्यादित्यत आह। शुकादीति॥ वपंक्तिता प्रामाण्यमतमाश्रित्येति शेषः। एवं च वाक्यजन्ये प्रमाया गुणजन्यत्वे
न नेश्वरः साधयितुं शक्यते किं तु प्रकारान्तरेणैव साधनीय इति भावः। अत्र नैयायिकैकदेशिमतमात्रत्वेनेति शेषो न युक्तः तथा सत्येवं पूर्वे पू
र्वेतादृशाध्यापकेनेत्यादिरग्रिमग्रन्थस्य प्रत्ययानभ्युपगमानुसारिणसंगतत्वापातात्। शाब्दप्रमायामिति प्रमायां गुणजन्यत्वेऽपि र
ति शेषः। आदिपदेनाकाङ्क्षासत्त्योः संग्रहः। प्रमाणशब्दे तयोस्तत्संसर्गः संनवत्वमभिप्राय प्रमायाः गुणजन्यत्वेनैव च योग्यताविशिष्टता योग्यतासत्त्वेऽपि
रौद्वादिदोषाकाङ्क्षादिभ्रमे प्रमाया एवोत्पत्तेरिति ध्येयं। योग्यतास्वरूपसतीन हेतुरतो न गुणादुत्पत्तिरित्यत आह। यथार्थेति। यथार्थयोग्यता
ज्ञानं वेत्यर्थः योग्यायोग्यतासंशयो योग्यताभ्रमे यथार्थ एवेति भावः। लाघवादिति। शाब्दज्ञानत्वावच्छिन्ने योग्यताज्ञानस्य कारणतायामावश्यकत्वेन
लाघवात्तद्विशेषस्य यथार्थतत्त्वज्ञानस्यैव हेतुतास्तु न तु कल्प्यकारणभावस्य यथार्थवाक्यार्थज्ञानस्येत्यर्थः। उत्पत्त्यादिति। यथार्थवाक्यार्थ
ज्ञानगुणत्ववादिनापि ईश्वरवाक्यार्थप्रमोदायतत्प्रामाण्यस्यावश्यंसमर्थनीयत्वादिति भावः। न प्रमाणमिति। व्यवह्रियत इति शेषः। एवं वेदपा
ति एतत्त्वोपलक्षणं। लिङ्गाभासजन्यप्रमायामपि पक्षतावच्छेदकावच्छेदेन ज्ञाप्यवत्तिपक्षे लिङ्गज्ञानमबाधितत्वात् प्रमावाऽस्मदादेरेवगुण इति
तस्या अपि गुणजन्यत्वेन नेश्वरसिद्धिरित्यपि द्रष्टव्यं। प्रमाणशब्दत्वमिति। यद्यपि प्रमाणशब्दत्वप्रतिहेतुत्वसिद्धावपि गुणजन्यत्वेन नेश्वरसिद्धा
त्त्वपि द्रष्टव्यास्तमासमाहार्यं वचि शाब्दप्रमां प्रति हेतुत्वं न सिद्धमिति तथापि तादृशशाब्दकारणत्वेनापीश्वरः सिद्ध्यत्येवेति न प्रकृतानुपयोग इति
ध्येयं। विशेषणत्वे संभवति नोपलक्षणत्वमिति प्रमाणशब्दत्वप्रतिहेतुत्वे प्रमां प्रत्यपि हेतुत्वमिति तात्पर्यमित्याहुः। नवेति। मीमांसकस्येत्यर्थः।

को व१

मा ५ श १२

शुभे

नस्यात्तदान्वयव्यभिचारेणाधिकमपेक्षेतत्त्वेवंदोषेपिइदंजनमितिज्ञानद्वयेप्रत्येकंयथार्थत्वादितिभावः॥अप्रमाणंच ६
एवंचेति।तादृशाव्याप्यकेनसिद्धसाधनतावारणायस्वत्वंचेति।शुक्तादिप्रमाणग्राह्यस्यपदस्यसमत्वान्नव्यभिचारः।नन्वित्याहेति।तथाचव
भट्ट क्तुवाक्यार्थज्ञानस्यवाक्यप्रयोगएवनहेतुत्वंकुतस्तदुत्तरकालीनेश्रोतृवाक्यार्थज्ञानेइतिभावः यद्यपियथार्थयोगएतज्ज्ञानंगुणत्वे
॥२१॥ ननिरूढकैतव्याप्यपिनदृढेवकृततात्पर्यमप्रयोजकमितितदाप्रयेषयपिसिद्धिरित्याशंकते।अर्थेति।अयमपिपूर्वोक्तन्यायेनावधृष्यकथ्यो
ज्ञ्यतायथार्थज्ञानादेवप्राप्तेश्चमोत्स्वैतोवक्तृयथार्थज्ञानवक्तृतात्पर्यमन्यथासिद्धमेवस्तुकादिवाक्यवदन्यथापयतत्त्वचतथाप्यनु
२१ पेत्यसमाधत्ते।मीमांसते।अनादावितिनयत्रचनजातिपत्वंतथावदस्यतत्त्वमतानित्यत्वमेवेतिभावः॥आप्तोक्तस्त्विति।अत्रवाक्ये दि ५
दानुपानस्तुत्यमित्याहुः।व्यभिचाराभावादिति।ज्ञानसामग्रीसत्वेपियदियथार्थत्वेति।तस्यत्वयापिपरतस्त्वाभ्युपगमात्तथावस
वेधीयथार्थत्वाभ्युपगमेतवापसिद्धांतइतिभावः।।विपरीतव्यवहारजनकरूपस्याप्रामाण्यस्यात्पत्तौपरतस्त्वसाधयति।तत्रेति।उक्त ॥भट्ट।
व्यवहारजनकत्वंतज्ज्ञानकत्ताविद्धेदकरूपवत्त्वंतच्चासंसर्गाग्रहरूपंतच्चदोषादित्यर्थः।विपरीतव्यवहारजनकज्ञानोत्पत्तिकालीने ॥२१॥
न१ धर्मिधर्मिणोरसंसर्गाग्रहेस्यैवज्ञानएकत्वासंसर्गाग्रहहेतुपयोगइत्यभिप्रेत्याह।ज्ञानसामग्र्यामिति।तादृशज्ञानसामग्रीकालीनएव
धर्मिधर्मिणोरसंसर्गाग्रहेदोषस्योपयोगोयेचतयोरसंसर्गाग्रहहेतुत्वेत्यभिप्रेत्याह॥दोषहेतुकेति।तादृशज्ञानेनियतंतरधर्मधर्मि
णोरसंसर्गाग्रहेतादृशज्ञानद्वयेएकत्वासंसर्गाग्रहेवदोषस्यैवोपयोगमभिप्रेत्याह।उत्पन्नज्ञानेति॥४॥उक्ताप्रामाण्यस्योत्पत्तौ
परतस्त्वंसाधयति।उत्पत्तेवेति।व्यभिचारादिति।प्रमास्थलेदोषविना।पिज्ञानस्वरूपस्योत्पत्तेरप्रमास्थलेचदोषाभावेविना
पितस्योत्पत्तेर्व्यभिचारइत्यर्थः।ज्ञानायथार्थत्वोभ्युपगमेपिनस्वतस्त्वहानिरित्याह।ज्ञानायथार्थत्वेपीति॥धर्मेशइति।तत्रवगुण
दोषाभावौनतेषां।न्यायाधर्मेशेपिप्रामाण्यापत्तिरितिभावः॥विरोधादिति।एकज्ञानेप्रामाण्याप्रामाण्ययोर्वैछेदकमेदेनसाम ज्ञान
ग्रांदोषापेक्षानपेक्षसंभवतोनतुस्त्रवच्छेदकमेदेनाधिदेशतदभावापन्नप्रतियोगितदभावयोरेकत्रावजनकत्वादित्यर्थः।कचित्कथ्य

ष

दोषदूत्तानभ्युपगमेपिहमुक्त्वमितिध्येयं। परगुणादोषजन्यत्वदोषाभावप्रयुक्तत्वदोषजन्यत्वेपि विसंवादेप्रवाऽवाधकदृष्टं भेदेनाविरोधउभयत्रापितुल्य
त्वगाप्रकानस्यसंवादिदोषेदोषजन्यत्वेपिअसत्वे दोषविषयत्वेतत्रतज्जन्यत्वनाव तुष्टकमितितद्देशीदोषसापेक्षासामग्रीत्यर्थः। आते। मदर्थविष
ये त्वेतु नन्तज्ज्ञानावच्छेदकमित्येतत्तदेशेनदोषरैपेक्षासेत्यत्र यथार्थतेतिभावः। दृष्टदोषसापेक्षत्वेज्ञाना यथार्थमभ्युपेत्योक्तं। सर्वेषांयथा
र्थत्वप्रसंगेतुभावपिदोषप्रसंगभावावच्छेदकसाधीनतुनततज्ञानतन्त्रकत्वादितपूर्वोक्तं स्मारयति। यथार्थत्व इति। सर्वेषांयथार्थत्वप्रसंग इत्यर्थः।
अत्र दोषस्यापाससंगात्यग्रहस्वोपयोगस्य दृशीतत्वादिति भावः॥ प्रामाण्यस्योत्पत्तौस्वतस्त्वं समर्थ्य ज्ञप्तौ समर्थयति। यथार्थत्वेन
यथार्थत्वेनाधिगतविषयस्थलमेवतद्यापित्वानोल्लिखितप्रकारवद्विशेष्यकज्ञानत्वविवक्षितमितिध्येयं। ननु विशेष्यावृत्यप्रकारकत्वादि
कमपिप्रामाण्यमतेन्यूहा। अत आह। वेति। अन्यथेति। निश्चितेति। वस्तुगतिमनुसंधानेनमयाऽनेनतत्प्रामाण्यस्य स्वतस्त्वमनुक्तं। ननु
तन्निश्चयः प्रवृत्त्यंगं गौरवात्। नत्वाव्यवसायकाले निश्चयोऽपेक्षितः। विलंबे प्रवृत्त्यविलंबेवाव्यर्थः। अन्यथेति। तथा च प्रामा य
